# छान्दोग्योपनिषत्

## अष्टमः खण्डः

यस्मिन् मनसि जीवेनात्मना अनुप्रविष्टा परा देवता, आदर्शे इव पुरुषः प्रतिबिम्बेन, जलादिषु इव च सूर्यादयः प्रतिबिम्बैः, तन्मनः अन्नमयं तेजोऽम्मयाभ्यां वाक्प्राणाभ्यां सङ्गतम् अधिगतम्। यन्मयः यत्स्थश्च जीवः मनन-दर्शन-श्रवणादि-व्यवहाराय कल्पते, तदुपरमे च स्वं देवता-रूपम् एव प्रतिपद्यते।

तदुक्तं श्रुत्यन्तरे "ध्यायति इव लेलायति इव सधीः स्वप्नो भूत्वा इमं लोकम् अतिक्रामति[1]" (बृ. ४.३.७) "स वा अयमात्मा ब्रह्म विज्ञानमयः मनोमयः[2]" (बृ. ४.४.५) इत्यादि, "स्वप्नेन शारीरम्[3] (अभिप्रहत्य आसुप्तः

---

[1] 'तत्रस्थभाष्यम् - तत्समानः सन् ध्यायति इव.. लेलायति इव....न तु परमार्थतः चलनधर्मकं तदात्मज्योतिः। कथं पुनः एतत् अवगम्यते तत्समानत्व-भ्रान्तिरेव उभयलोकसञ्चरणादिहेतुः, न स्वतः इति अस्य अर्थस्य प्रदर्शनाय हेतुः उपदिश्यते - स आत्मा हि यस्मात् स्वप्नो भूत्वा यया धिया समानः सा धीः यद्यत् भवति तत्तत् असौ अपि भवति इव, तस्मात् यदा असौ स्वप्नः भवति स्वापवृत्तिं प्रतिपद्यते धीः, तदा सः अपि स्वप्नवृत्तिं प्रतिपद्यते। यदा धीः जिजागरिषति तदा असौ अपि, अतः आह - स्वप्नः भूत्वा स्वप्नप्रवृत्तिं अवभासयन् धियः स्वापवृत्त्याकारः भूत्वा इमं लोकं जगरितव्यवहारलक्षणं कार्य-करण-सङ्घातात्मकं लौकिकशास्त्रीयव्यवहारास्पदं अतिक्रामति अतीत्य क्रामति विविक्तेन स्वेन आत्मज्योतिषा स्वप्नात्मिकां धीवृत्तिम् अवभासयन् अवतिष्ठते।

[2] प्राणमयः चक्षुर्मयः श्रोत्रमयः ..इति यथाकारी यथाचारी तथा भवति। बृ. ४-४-५ - तत्रस्थभाष्यम् - स वा अयं यः एवं संसरति आत्मा ब्रह्म एव परः एव यः अशनायादि-अतीतः विज्ञानमयः विज्ञानं बुद्धिः तेन उपलक्ष्यमाणः तन्मयः विज्ञानमयः विज्ञानप्रायः तथा मनोमयः मनःसंनिकर्षात् मनोमयः...एवं तस्य तस्य इन्द्रियस्य व्यापारोद्भवे तत्तन्मयः भवति।

[3] भाष्यम् - स्वप्नेन स्वप्नभावेन शारीरं शरीरं अभिप्रहत्य निश्चेष्टमापाद्य आसुप्तः स्वयम् अलुप्त-दृगादिशक्तिस्वाभाव्यात् सुप्तान् वासनाकारोद्भूतान् अन्तःकरणवृत्याश्रयान् बाह्य-अध्यात्मिकान् सर्वान् एव भावान् स्वेन रूपेण प्रत्यस्तमितान् सुप्तानभिचाकशीति अलुप्तया आत्मदृष्ट्या पश्यति अवभासयति इत्यर्थः।

सुप्तान् अभिचाकशीति)” (बृ ४.३.११) इत्यादि, “प्राणन्नेव प्राणो नाम भवति” (बृ. १.४.७)[4] इत्यादि च।

तस्य अस्य मनस्स्थस्य मन-आख्यां गतस्य मन-उपशम-द्वारेण इन्द्रिय-विषयेभ्यः निवृत्तस्य यस्यां परस्यां देवतायां स्वात्म-भूतायां यदवस्थानं तत् पुत्राय आचिख्यासुः -

**उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्रान्तं मे सोम्य विजानीहीति।**

**यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवति, तस्मादेनँ स्वपितीत्याचक्षते, स्वँ ह्यपीतो भवति।। ६.८.१ ।।**

उद्दालको ह आरुणिः पुत्रं श्वेतकेतम् उवाच। सोम्य मे स्वप्नान्तं विजानीहि इति। सोम्य यत्र एतत् पुरुषः स्वपिति नाम तदा सता सम्पन्नो भवति। स्वम् अपीतो भवति। तस्मात् एनं स्वपिति इति आचक्षते। स्वं हि अपीतो भवति । १

**उद्दालकः** **ह** किल **आरुणिः** **श्वेतकेतुं** **पुत्रम्** **उवाच** उक्तवान्। **स्वप्रान्तं** स्वप्र-मध्यं, स्वप्रः इति दर्शन-वृत्तेः स्वप्रस्य आख्या, तस्य मध्यं स्वप्रान्तं, सुषुप्तम् इत्येतत्। अथवा स्वप्रान्तं स्वप्र-सतत्त्वम् इत्यर्थः।

---

[4] तत्रस्थभाष्यम् - प्राणन्नेव प्राणनक्रियाम् एव कुर्वन् प्राणो नाम प्राणसमाख्यः प्राणाभिधानः भवति । प्राणनक्रिया-कर्त्तृत्वात् हि प्राणः प्राणिति इति उच्यते, न अन्यां क्रियां कुर्वन् .. तस्मात् क्रियान्तरविशिष्टस्य-अनुपसंहारात् अकृत्स्नो हि सः।

तत्रापि अर्थात् सुषुप्तम् एव भवति। स्वमपीतो भवति इति वचनात्।

न हि अन्यत्र सुषुप्तात् स्वम् अपीतिं जीवस्य इच्छन्ति ब्रह्मविदः।

तत्र हि आदर्शापनयने पुरुष-प्रतिबिम्बः आदर्श-गतः यथा स्वमेव पुरुषम् अपीतो भवति, एवं मन-आद्युपरमे चैतन्य-प्रतिबिम्ब-रूपेण जीवेनात्मना मनसि प्रविष्टा नामरूप-व्याकरणाय परा देवता सा स्वमेव आत्मानं प्रतिपद्यते जीव-रूपतां मन-आख्यां हित्वा। अतः सुषुप्तः एव स्वप्नान्त-शब्द-वाच्यः इत्यवगम्यते।

यत्र तु सुप्तः स्वप्नान् पश्यति तत् स्वाप्नं दर्शनं सुख-दुःख-संयुक्तमिति पुण्यापुण्य-कार्यम्।

पुण्यापुण्ययोः हि सुख-दुःखारम्भकत्वं प्रसिद्धम्। पुण्यापुण्ययोः च अविद्या-कामोपष्टम्भेन एव सुख-दुःख-तद्दर्शन-कार्यारम्भकत्वम् उपपद्यते, न अन्यथा इति अविद्या-काम-कर्मभिः संसार-हेतुभिः संयुक्तः एव स्वप्नः इति न स्वमपीतो भवति।

"अनन्वागतं पुण्येनानन्वागतं पापेन, तीर्णः हि तदा सर्वान् शोकान् हृदयस्य भवति[5]" (बृ ४.३.२२) "तद्वा अस्यैतदतिच्छन्दाः[6]" (बृ. ४.३.२१) "एष परमः आनन्दः" (बृ. ४.३.३३) इत्यादि-श्रुतिभ्यः।

सुषुप्तः एव स्वं देवता-रूपं जीवत्व-विनिर्मुक्तं दर्शयिष्यामि इत्याह - स्वप्रान्तं **मे** मम निगदतः हे **सोम्य विजानीहि** विस्पष्टम् अवधारय इत्यर्थः।

कदा स्वप्रान्तो भवति? **इति** उच्यते। **यत्र** यस्मिन् काले **एतत् नाम** भवति पुरुषस्य स्वप्स्यतः। प्रसिद्धं हि लोके **स्वपिति** इति। गौणं च इदं नाम इत्याह। यदा स्वपिति इति उच्यते पुरुषः **तदा** तस्मिन् काले **सता** सच्छब्द-वाच्यया प्रकृतया देवतया **सम्पन्नो भवति**, सङ्गतः एकीभूतः भवति।

---

[5] तत्रस्थभाष्यम् - अनन्वागतं न अन्वागतम् अनन्वागतमसम्बद्धं इत्येतत्। पुण्येन शास्त्रविहितेन कर्मणा तथा पापेन विहिताकरण-प्रतिषिद्धक्रियालक्षणेन। किं पुनर् असम्बद्धत्वे कारणम् इति तत् हेतुः उच्यते । तीर्णः अतिक्रान्तः हि यस्मात् एवं रूपः तदा तस्मिन्काले सर्वान् शोकान् शोकाः कामाः। ....हृदयस्य बुद्धेः ये शोकाः कामाः। ..हृदयकरणसंबन्धातीतत्वात् तत्संश्रयकामसंबन्धातीतः भवति इति।

[6] तत्रस्थभाष्यम् - तदेतद्वा अस्य रूपं यः सर्वात्मभावः सः अस्य परमः लोकः इत्युक्तः तत् अतिच्छन्दा अतिच्छन्दम् इत्यर्थः । रूपपरत्वात्। छन्दः कामः, अतिगतः छन्दः यस्मात् रूपात् तत् अतिच्छन्दं रूपम्।

मनसि प्रविष्टं मन-आदि-संसर्ग-कृतं जीव-रूपं परित्यज्य **स्वं** सद्रूपं यत् परमार्थ-सत्यम् **अपीतः** अपिगतः

**भवति**। अतः **तस्मात् स्वपिति इति एनम् आचक्षते** लौकिकाः। **स्वम्** आत्मानं **हि** यस्मात् **अपीतो भवति**।

गुण-नाम-प्रसिद्धितः अपि स्वात्म-प्राप्तिः गम्यते इत्यभिप्रायः।

कथं पुनः लौकिकानां प्रसिद्धा स्वात्म-सम्पत्तिः**?** जाग्रत्-श्रम-निमित्तोद्भवत्वात् स्वापस्य इत्याहुः।

जागरिते हि पुण्यापुण्य-निमित्त-सुख-दुःखाद्यनेकायासानुभवात् श्रान्तः भवति, ततश्च आयस्तानां करणानाम्

अनेक-व्यापार-निमित्त-ग्लानानां स्वव्यापारेभ्यः उपरमः भवति।

श्रुतेश्च **“**श्राम्यत्येव वाक् श्राम्यति चक्षुः**”** (बृ. १.५.२१) इत्येवमादि।

तथा च "गृहीता वाक्, गृहीतं चक्षुः, गृहीतं श्रोत्रं, गृहीतं मनः" (बृ. २.१.१७) इत्येवमादीनि करणानि प्राण-

ग्रस्तानि।

प्राणः एकः अश्रान्तः देहे कुलाये यः जागर्त्ति तदा जीवः श्रमापनुत्तये स्वं देवता-रूपम् आत्मानं प्रतिपद्यते।

न अन्यत्र स्वरूपावस्थानात् श्रमापनोदः स्यात् इति युक्ता प्रसिद्धिः लौकिकानां स्वं हि अपीतो भवति इति।

दृश्यते हि लोके ज्वरादि-रोग-ग्रस्तानां तद्विनिर्मोके स्वात्मस्थानां विश्रमणं तद्वदिहापि स्यादिति युक्तम्।

"तद्यथा (अस्मिन्नाकाशे) श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः[7]" (बृ. ४.३.१९) इत्यादि-श्रुतेश्च।। १।।

---

[7] तत्रस्थ-भाष्यम् - तद्यथा अस्मिन्नाकाशे भौतिके श्येनो वा सुपर्णो वा विहृत्य (भक्ष्यार्थं) विपरिपत्य श्रान्तः नानापरिपतनलक्षणेन कर्मणा परिखिन्नः संहत्य पक्षौ संलयाय नीडाय एव ध्रियते।

तत्र अयं दृष्टान्तः यथोक्ते अर्थे -

**स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयते एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनँ्हि सोम्य मन इति।। ६.८.२ ।।**

स **यथा** **शकुनिः** पक्षी शकुनि-घातकस्य हस्त-गतेन **सूत्रेण** **प्रबद्धः** पाशितः **दिशं** **दिशं** बन्धन-मोक्षार्थी सन् प्रतिदिशं **पतित्वा** **अन्यत्र** बन्धनात् **आयतनम्** आश्रयं विश्रमणाय **अलब्ध्वा** अप्राप्य **बन्धनमेव** **उपश्रयते**।

**एवमेव** यथा अयं दृष्टान्तः **खलु** **हे** **सोम्य** **तन्मनः** तत्प्रकृतं षोडश-कलं अन्नोपचितं मनो-निर्धारितं तत्प्रविष्टः तत्स्थः तदुपलक्षितः जीवः तन्मनः इति निर्दिश्यते मञ्चाक्रोशनवत्[8]।

---

[8] मञ्चाः क्रोशन्ति इति वाक्ये मञ्चशब्देन मञ्चस्था उच्यन्ते तद्वत् मनःशब्देन मनसि स्थितः मनोपाधिकः जीव उच्यते।

स मन-आख्य-उपाधिः जीवः अविद्या-काम-कर्मोपदिष्टां **दिशं** **दिशं** सुख-दुःखादि-लक्षणां जाग्रत्-स्वप्नयोः **पतित्वा** गत्वा अनुभूय इत्यर्थः। **अन्यत्र** सदाख्यात् स्वात्मनः **आयतनं** विश्रमण-स्थानं **अलब्ध्वा** **प्राणमेव** प्राणेन सर्व-कार्य-करणाश्रयेण उपलक्षिता प्राणः इति उच्यते सदाख्या परा देवता, "प्राणस्य प्राणम्[9]" (बृ. ४.४.१८) "प्राण-शरीरो भारूपः[10]" (छा. ३.१४.२) इत्यादि-श्रुतेः।

अतः तां देवतां प्राणं प्राणाख्यामेव **उपश्रयते**। प्राणः बन्धनं यस्य मनसः तत् **प्राणबन्धनं** **हि** यस्मात् **सोम्य** **मनः** प्राणोपलक्षित-देवताश्रयं मनः इति तदुपलक्षितः जीव इति।। २ ।।

---

[9] तत्रस्थभाष्यम् - तेन हि चैतन्यात्मज्योतिषा अवभास्यमानः प्राणः आत्मभूतेन प्राणिति इति तेन प्राणस्यापि प्राणः तं प्राणस्य प्राणम्।

[10] तत्रस्थभाष्यम् - प्राणः लिङ्गात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्च्छितः (संमूर्च्छितत्वं सपिण्डितत्वम् इत्यर्थः) स शरीरं यस्य स प्राणशरीरः । भारूपः भा दीप्तिः चैतन्यलक्षणा रूपं यस्य स भारूपः।

एवं स्वपिति नाम प्रसिद्धि-द्वारेण यज्जीवस्य सत्य-स्वरूपं जगतः मूलं तत् पुत्रस्य दर्शयित्वा आह अन्नादि-कार्य-कारण-परम्परया अपि जगतः मूलं सद् दिदर्शयिषुः -

**अशनापिपासे मे सोम्य विजानीहीति, यत्रैतत् पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति, तत्रैतच्छुङ्गमुत्पतितँ सोम्य विजानीहि नेदममूलं भविष्यतीति।। ६.८.३ ।।**

**अशनापिपासे** अशितुमिच्छा अशना, या-लोपेन। पातुमिच्छा पिपासा, ते अशना-पिपासे। अशना-पिपासयोः सतत्त्वं **विजानीहि** **इति** एतत्। **यत्र** यस्मिन् काले **एतत्** **नाम** **पुरुषः** भवति। किं तत्? **अशिशिषति** अशितुमिच्छति इति। तदा तस्य पुरुषस्य किं निमित्तं नाम भवति? इत्याह - यत् **तत्** पुरुषेण **अशितम्** अन्नं कठिनं पीताः **आपः** **नयन्ते** द्रवी-कृत्य रसादि-भावेन विपरिणमयन्ते तदा भुक्तम् अन्नं जीर्यति।

अथ च भवत्यस्य नाम अशिशिषति इति गौणम्। जीर्णे हि अन्ने अशितुमिच्छति सर्वो हि जन्तुः।

**तत्** तत्र, अपाम् अशित-नेतृत्वाद् अशनाया इति नाम प्रसिद्धं इत्येतस्मिन् अर्थे। **यथा** **गोनायः** गां नयति इति गोनायः इत्युच्यते गोपालः। तथा अश्वान् नयति इति **अश्वनायः** अश्वपालः इत्युच्यते। **पुरुषनायः** पुरुषान् नयति इति राजा सेनापतिर्वा। **एवं** **तत्** तदा **अपः** **आचक्षते** लौकिकाः **अशनाया** **इति** विसर्जनीय-लोपेन।

**तत्र** एवं सति अद्भिः रसादि-भावेन नीतेन, अशितेन अन्नेन, निष्पादितं इदं शरीरं वट-कणिकायाम् इव शुङ्गः अङ्कुरः उत्पतितः उद्गतः तमिमं **शुङ्गं** कार्यं, शरीराख्यं, वटादि-शुङ्गवत् **उत्पतितं**, **हे** **सोम्य** **विजानीहि**।

किं तत्र विज्ञेयम्? इत्युच्यते - शृणु **इदं** शुङ्गवत् कार्यत्वात् शरीरं **न** **अमूलं** मूल-रहितं **भविष्यति** ।। ३।।

इत्युक्तः आह श्वेतकेतुः - यदि एवं समूलमिदं शरीरं वटादि-शुङ्गवत् तस्य अस्य शरीरस्य क्व मूलं स्याद्भवेत्

इत्येवं पृष्टः आह पिता -

**तस्य क्व मूलँ्स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः।। ६.८.४ ।।**

**तस्य क्व मूलं स्यात् अन्यत्र अन्नात्**, अन्नं मूलमित्यभिप्रायः।

कथम्**?** अशितं हि अन्नमद्भिः द्रवीकृतं जाठरेणाग्निना पच्यमानं रस-भावेन परिणमते।

रसात् शोणितं, शोणितान्मांसं, मांसान्मेदः, मेदसोऽस्थीनि, अस्थिभ्यो मज्जा, मज्जायाः शुक्रम्।

तथा योषिद्भुक्तं च अन्नं रसादि-क्रमेण एवं परिणतं लोहितं भवति।

ताभ्यां शुक्र-शोणिताभ्यामन्न-कार्याभ्यां संयुक्ताभ्यामन्नेनैव प्रत्यहं भुज्यमानेन आपूर्यमाणाभ्यां कुड्यम् इव मृत्पिण्डैः प्रत्यहम् उपचीयमानः अन्न-मूलः देहशुङ्गः परिनिष्पन्नः इत्यर्थः।

यत्तु देह-शुङ्गस्य मूलम् अन्नं निर्दिष्टं तदपि देहवत् विनाशोत्पत्तिमत्वात् कस्माच्चिद् मूलाद् उत्पतितं शुङ्गः एवेति कृत्वा आह - यथा देह-शुङ्गः अन्नमूलः, **एवमेव खलु सोम्य अन्नेन शुङ्गेन** कार्य-भूतेन **आपः मूलम्** अन्नस्य शुङ्गस्य **अन्विच्छ** प्रतिपद्यस्व।

अपामपि विनाशोत्पत्तिमत्वात् शुङ्गत्वमेव इति, **अद्भिः सोम्य शुङ्गेन** कार्येण कारणं **तेजो मूलमन्विच्छ**।

तेजसोऽपि विनाशोत्पत्तिमत्वात् शुङ्गत्वम् इति **तेजसा सोम्य शुङ्गेन सन्मूलम्** एकमेवाद्वितीयं परमार्थ-सत्यम्।

यस्मिन् सर्वमिदं वाचारम्भणं विकारो नामधेयम् अनृतं रज्ज्वाम् इव सर्पादि-विकल्प-जातम् अध्यस्तमविद्यया,

तदस्य जगतो मूलम्। अतः **सन्मूलाः** सत्कारणाः **हे** **सोम्य** **इमाः** स्थावर-जङ्गम-लक्षणाः **सर्वाः** **प्रजाः**।

न केवलं सन्मूलाः एव, इदानीमपि स्थिति-काले **सदायतनाः** सदाश्रयाः एव।

न हि मृदमनाश्रित्य घटादेः सत्त्वं स्थितिर्वा अस्ति।

अतः मृद्वत् सन्मूलत्वात् प्रजानां सदायतनं यासां ताः सदायतनाः प्रजाः।

अन्ते च **सत्प्रतिष्ठाः** सदेव प्रतिष्ठा लयः समाप्तिः अवसानं परिशेषः यासां ताः सत्प्रतिष्ठाः।। ४।।

**अथ यत्रैतत् पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्टे उदन्येति तत्रैतदेव शुङ्गम् उत्पतितँ सोम्य विजानीहि नेदममूलं भविष्यतीति।। ६.८.५ ।।**

**अथ** इदानीम् अप्शुङ्ग-द्वारेण सतो मूलस्य अनुगमः कार्यः इत्याह। **यत्र** यस्मिन् काले **एतन्नाम** **पिपासति** पातुमिच्छति इति **पुरुषः** भवति। अशिशिषति इतिवदिदमपि गौणमेव नाम भवति। द्रवीकृतस्य अशितस्य अन्नस्य नेत्र्यः आपः अन्न-शुङ्गं देहं क्लेदयन्त्यः शिथिली-कुर्युः अब्बाहुल्यात्, यदि तेजसा न शोष्यन्ते। नितरां च तेजसा शोष्यमाणासु अप्सु देह-भावेन परिणममानासु पातुमिच्छा पुरुषस्य जायते। तदा पुरुषः पिपासति नाम। तदेतदाह - **तेज** **एव** **तत्** तदा **पीतम्** अबादि शोषयद् देह-गत-लोहित-प्राण-भावेन **नयते** परिणमयति। **तत्** **यथा** **गोनायः** इत्यादि समानम्। **एवं** **तत्तेज** **आचष्टे** लोकः **उदन्येति** उदकं नयति इति उदन्यम्। उदन्येति इति च्छान्दसम्। **तत्र** अपि[11] पूर्ववत्। अपामपि **एतदेव** शरीराख्यं **शुङ्गं** नान्यत् इत्येवमादि समानमन्यत्।। ५।।

[11] तेजस्यपि इत्येतत्।

**तस्य क्व मूलँ स्यादन्यत्राद्भ्यः। अद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ।**

**तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ। सन्मूलाः सोम्य इमाः सर्वाः प्रजाः सदायतनाः**

**सत्प्रतिष्ठाः। यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति**

**तदुक्तं पुरस्तादेव भवति। [12]अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः**

**प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्।। ६.८.६ ।।**

सामर्थ्यात् तेजसः अपि एतदेव शरीराख्यं शुङ्गम्। अतः अप्शुङ्गेन देहेन आपः मूलं गम्यते।

अद्भिः शुङ्गेन तेजो मूलं गम्यते। तेजसा शुङ्गेन सन्मूलं गम्यते पूर्ववत्। एवं हि तेजोबन्नमयस्य देह-शुङ्गस्य

वाचारम्भण-मात्रस्य अन्नादि-परम्परया परमार्थ-सत्यं **सन्मूलं** अभयम् असन्त्रासं निरायासं सन्मूलम् **अन्विच्छ**

इति पुत्रं गमयित्वा, अशिशिषति पिपासति इति नाम-प्रसिद्धि-द्वारेण यद् अन्यदिह अस्मिन् प्रकरणे तेजोबन्नानां

---

[12] एतानि वाक्यान्यधिकृत्य ब्रह्मसूत्रे (४.२.१, ४.२.२, ४.२.४, ४.३.५, ४.३.६) विचाराः कृताः।

पुरुषेण उपभुज्यमानानां कार्य-करण-सङ्घातस्य देह-शुङ्गस्य स्वजात्यसाङ्कर्येण उपचयकरत्वं वक्तव्यं प्राप्तं तदिह

उक्तमेव द्रष्टव्यम् इति पूर्वोक्तं व्यपदिशति।

**यथा नु खलु** येन प्रकारेण **इमाः** तेजोबन्नाख्याः **तिस्रः देवताः पुरुषं प्राप्य त्रिवृत् त्रिवृत् एकैका भवति**

**तदुक्तं पुरस्तादेव भवति** "अन्नम् अशितं त्रेधा विधीयते" (छा.६.६.१-३) इत्यादि तत्रैव उक्तम्।

अन्नादीनाम् अशितानां ये मध्यमाः धातवः ते साप्त-धातुकं शरीरम् उपचिन्वन्ति इत्युक्तम्, मांसं भवति, लोहितं

भवति, मज्जा भवति, अस्थि भवति इति। ये तु अणिष्ठाः धातवः मनः प्राणं वाचं देहस्य अन्तः-करण-सङ्घातम्

उपचिन्वन्ति इति च उक्तम् "तन् मनो भवति", "स प्राणो भवति", "सा वाग् भवति" इति।

सोऽयं प्राण-करण-सङ्घातः देहे विशीर्णे देहान्तरं जीवाधिष्ठितः येन क्रमेण पूर्व-देहात् प्रच्युतः गच्छति तदाह -

**अस्य** हे **सोम्य** **पुरुषस्य** **प्रयतः** म्रियमाणस्य **वाङ्मनसि** **सम्पद्यते** मनसि उपसंह्रियते।

अथ तदा आहुः ज्ञातयः 'न वदति' इति। मनः-पूर्वको हि वाग्व्यापारः। "यद्वै मनसा ध्यायति तद्वाचा वदति" (नृ.पू.ता.उ १.१) इति श्रुतेः। वाचि उपसंहृतायां मनसि, मनः मनन-व्यापारेण केवलेन वर्त्तते।

मनः अपि यदा उपसंह्रियते तदा **मनः** **प्राणे** सम्पन्नं भवति सुषुप्त-काले इव। तदा पार्श्वस्थाः ज्ञातयः 'न विजानाति' इत्याहुः। **प्राणः** च तदा ऊर्ध्व-उच्छ्वासी स्वात्मनि उपसंहृत-बाह्य-करणः संवर्ग-विद्यायां[13] दर्शनात् (छा. ४.३.३)[14] हस्त-पादादीन् विक्षिपन् मर्म-स्थानानि निकृन्तन् अन इव उत्सृजन्[15] क्रमेण उपसंहृतः **तेजसि** सम्पद्यते।

---

[13] कथं प्राणस्य स्वात्मनि उपसंहृत-बाह्यकरणत्वं तदाह - संवर्गेति।

[14] प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः इति श्रुतिः। संवर्ग-विद्यावाक्ये वाचा कर्मेन्द्रिय-उपलक्षणात् चक्षुःश्रोत्राभ्यां च ज्ञानेन्द्रिय-उपलक्षणात् सर्वकरण-उपसंहार-सिद्धिः इति।

[15] अनः शकटम्, उत्सर्जनम् हिक्कादिशब्दकरणम्।

तदा आहुः ज्ञातयः ‘न चलति’ इति।

‘मृतः न इति वा’ विचिकित्सन्तः देहम् आलभमानाः उष्णं च उपलभमानाः, देहः उष्णः, जीवति इति।

यदा तदपि औष्ण्य-लिङ्गं तेजः उपसंह्रियते तदा तत् **तेजः** **परस्यां** **देवतायां** प्रशाम्यति।

तदैवं क्रमेण उपसंहृते स्वमूलं प्राप्ते च मनसि, तत्स्थः जीवः अपि सुषुप्त-कालवत् निमित्तोपसंहाराद् उपसंह्रियमाणः सन्, सत्याभिसन्धि-पूर्वकं चेत् उपसंह्रियते सदेव सम्पद्यते, न पुनः देहान्तराय सुषुप्ताद् इव उत्तिष्ठति। यथा लोके सभये देशे वर्त्तमानः कथञ्चिदिव अभयं देशं प्राप्तः तद्वत्।

इतरस्तु अनात्मज्ञः तस्मादेव मूलात् सुषुप्ताद् इव उत्थाय मृत्वा पुनः देह-जालम् आविशति।। ६।।

**स य एषोऽणिमा। ऐतदात्म्यमिदँ सर्वम्। तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच।। ६.८.७ ।।**

यस्मान् मूलात् उत्थाय देहमाविशति जीवः **स** **यः** सदाख्यः **एषः** उक्तः **अणिमा** अणु-भावः जगतो मूलम्।

**ऐतदात्म्यम्**, एतत् सत् आत्मा यस्य सर्वस्य तत् एतदात्मः, तस्य भावः ऐतदात्म्यम्।

एतेन सदाख्येन आत्मना आत्मवत् **सर्वम्** **इदं** जगत्। न अन्यः अस्ति अस्य आत्मा संसारी।

“नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ” (बृ. ३.८.११) इत्यादि श्रुत्यन्तरात्।

येन च आत्मना आत्मवत् सर्वमिदं जगत् **तद्** एव सदाख्यं कारणं **सत्यं** परमार्थसत्।

अतः **स** एव **आत्मा** जगतः प्रत्यक्स्वरूपं सतत्त्वं याथात्म्यम्।

आत्म-शब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादि-शब्दवत् निरूढत्वात्। अतः **तत्** सत् **त्वमसि** इति हे

**श्वेतकेतो**।

इत्येवं प्रत्यायितः पुत्र आह - **भूय** **एव** **मा** **भगवान्** **विज्ञापयतु** यद्भवदुक्तं तत् सन्दिग्धं मम।

अहन्यहनि सर्वाः प्रजाः सुषुप्ते सत् सम्पद्यन्ते इत्येतत् येन सत् सम्पद्य न विदुः ‘सत्सम्पन्नाः वयम्’ इति।

अतो दृष्टान्तेन मां प्रत्याययतु इत्यर्थः। एवमुक्तः **तथा** अस्तु **सोम्य** **इति** **होवाच** पिता।। ७।।

## नवमः खण्डः

यत्पृच्छसि अहन्यहनि सत् सम्पद्य न विदुः 'सत्सम्पन्नाः स्म' इति तत् कस्मात् इत्यत्र शृणु दृष्टान्तम् -

**यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाँ् रसान्**

**समवहारमेकताँ् रसं गमयन्ति।। ६.९.१ ।।**

**यथा** लोके हे **सोम्य** **मधुकृतः** मधु कुर्वन्ति इति मधुकृतः मधुकर-मक्षिकाः **मधु** **निस्तिष्ठन्ति** मधु निष्पादयन्ति तत्पराः सन्तः। कथम्? **नानात्ययानां** नाना-गतीनां[16] नाना-दिक्कानां **वृक्षाणां** **रसान्** **समवहारम्** समाहृत्य समाहृत्य[17] **एकताम्** एकभावं मधुत्वेन **रस**ान्[18] **गमयन्ति** मधुत्वम् आपादयन्ति।। १ ।।

---

[16] नानात्वेन गतिः ज्ञानं येषां तेषां नानाजातीयानां इत्यर्थः।

[17] द्वित्वं कैलासाश्रमपाठः। णमुल्लन्ते सति वीप्सा-अभावः छान्दसः।

[18] मूले रसमिति छान्दसः वचनव्यत्ययः इत्याशयेन आह - रसानिति।

**ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामहे इति।। ६.९.२ ।।**

**ते** रसाः **यथा** मधुत्वेन एकतां गताः **तत्र** मधुनि **विवेकं न लभन्ते**। कथम्**?** **अमुष्याहं** आम्रस्य पनसस्य वा **वृक्षस्य रसः अस्मि इति**। यथा हि लोके बहूनां चेतनावतां समेतानां प्राणिनां विवेक-लाभः भवति 'अमुष्याहं पुत्रः' 'अमुष्याहं नप्ता अस्मि' इति। ते च लब्ध-विवेकाः सन्तः न सङ्कीर्यन्ते। न तथा इह अनेक-प्रकार-वृक्ष-रसानामपि मधुराम्ल-तिक्त-कटुकादीनां मधुत्वेन एकतां गतानां मधुरादि-भावेन विवेकः गृह्यते इत्यभिप्रायः।

यथा अयं दृष्टान्तः इति **एवम् एव खलु सोम्य इमाः सर्वाः प्रजाः** अहन्यहनि **सति सम्पद्य** सुषुप्त-काले मरण-प्रलययोः च **न विदुः** न विजानीयुः **सति सम्पद्यामहे इति** सम्पन्नाः इति वा।। २ ।।

यस्माच्च एवम् आत्मनः सद्रूपताम् अज्ञात्वा एव सत्सम्पद्यन्ते, अतः -

**ते इह व्याघ्रो वा सिँ्हो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दँ्शो वा मशको वा यद्यद्भवन्ति तदाभवन्ति।। ६.९.३ ।।**

**ते इह** लोके यत्कर्म-निमित्तां यां यां जातिं प्रतिपन्नाः आसुः व्याघ्रादीनां 'व्याघ्रोऽहं' 'सिंहोऽहम्' इत्येवं ते तत्कर्म-ज्ञान-वासनाङ्किताः सन्तः सत्प्रविष्टाः अपि **तद्**-भावेन एव पुनः **आभवन्ति**, पुनः सतः आगत्य **व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यत्** पूर्वम् इह लोके **भवन्ति**। बभूवुः इत्यर्थः। **तत्** एव पुनः आगत्य भवन्ति युग-सहस्र-कोट्यन्तरिता अपि संसारिणः जन्तोः या पुरा भाविता वासना सा न नश्यति इत्यर्थः। "यथाप्रज्ञं हि सम्भवाः[19]" (ऐ.आ २.३.२) इति श्रुत्यन्तरात्।। ३ ।।

[19] सम्भवन्ति उद्पद्यन्ते इति सम्भवाः प्रजाः इति शेषः।

ताः प्रजाः यस्मिन् प्रविश्य पुनराविर्भवन्ति, ये तु इतः अन्ये सत्सत्यात्माभिसन्धाः[20] यमणुभावं सदात्मानं प्रविश्य

न आवर्त्तन्ते -

**स य एषोऽणिमा। ऐतदात्म्यमिदँ सर्वम्। तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो**

**इति। भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच।। ६.९.४ ।।**

**स य एषोऽणिमा** इत्यादि व्याख्यातम्। यथा लोके स्वकीये गृहे सुप्तः उत्थाय ग्रामान्तरं गतः जानाति स्वगृहाद्

आगतोऽस्मि इति, एवं सतः आगतोऽस्मि इति च जन्तूनां कस्माद्विज्ञानं न भवति इति **भूय एव मा भगवान्**

**विज्ञापयतु** इति उक्तः **तथा सोम्य इति होवाच** पिता।। ४ ।।

---

[20] ते इति तच्छब्दः अध्याहर्त्तव्यः अत्र।

## दशमः खण्डः

शृणु तत्र दृष्टान्तं यथा -

**इमाः सोम्य नद्यः पुरस्तात् प्राच्यः स्यन्दन्ते।**

**पश्चात् प्रतीच्यस्ताः समुद्रात् समुद्रमेवापियन्ति। स समुद्र एव भवति।**

**ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति।। ६.१०.१ ।।**

**सोम्य** **इमाः** **नद्यः** गङ्गाद्याः, **पुरस्तात्** पूर्वां दिशं प्रति **प्राच्यः** प्रागञ्चनाः **स्यन्दन्ते** स्रवन्ति।

**पश्चात्** प्रतीचीं दिशं प्रति सिन्ध्वाद्याः प्रतीचीम् अञ्चन्ति गच्छन्ति इति **प्रतीच्यः**।

**ताः** **समुद्रात्** अम्भो-निधेः जल-धरैः आक्षिप्ताः पुनः वृष्टि-रूपेण पतिताः गङ्गादि-नदी-रूपिण्यः पुनः **समुद्रम्** अम्भो-निधिम् **एव** **अपियन्ति**। **स** **समुद्रः** **एव** **भवति**। **ताः** नद्यः **यथा** **तत्र** समुद्रे समुद्रात्मना एकताम् गताः **न** **विदुः** न जानन्ति[21] **इयं** गङ्गा **अहमस्मि** **इयं** यमुना **अहमस्मि** **इति** इयं मह्यम् अहमस्मि इति च।। १ ।।

---

[21] वृष्ट्यादिरूपेण आगमनानन्तरं, समुद्रादागताः गङ्गाद्याः वयमिति न विदुः इति।

**एवमेव खलु सोम्येमाः सर्वाः प्रजाः सतः आगम्य न विदुः सतः आगच्छामहे**

**इति[22] ते इह व्याघ्रो वा सिँ्हो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दँ् शो वा**

**मशको वा यद्यद्भवन्ति तदाभवन्ति।। ६.१०.२ ।।**

**स य एषोऽणिमा। ऐतदात्म्यमिदँ्सर्वम्। तत्सत्यँ्स आत्मा तत्त्वमसि श्वेतकेतो**

**इति। भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच।। ६.१०.३।।**

**एवमेव** **खलु** **सोम्य** **इमाः** **सर्वाः** **प्रजाः** यस्मात् सति सम्पद्य न विदुः तस्मात् **सतः** **आगम्य** **न** **विदुः** **सतः** **आगच्छामहे** आगताः **इति** वा। **ते** **इह** **व्याघ्रः** इत्यादि समानमन्यत्।

दृष्टं लोके जले वीची-तरङ्ग-फेन-बुद्-बुदायः उत्थिताः पुनस्तद्भभावं गताः विनष्टाः इति।

जीवास्तु तत्कारणमणुभावं प्रत्यहं गच्छन्तोऽपि सुषुप्ते मरण-प्रलययोश्च न विनश्यन्ति इत्येतत् **भूय** **एव** **मा** **भगवान्** **विज्ञापयतु** दृष्टान्तेन। **तथा** **सोम्य** **इति** **होवाच** पिता।।२-३।।

---

[22] अत्र ब्रह्मसूत्रम् ३.२.९।

एकादशः खण्डः

शृणु दृष्टान्तम् -

**अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन् स्रवेत्।**

**यो मध्येऽभ्याहन्याज्जीवन् स्रवेत्। यो अग्रेऽभ्याहन्याज्जीवन् स्रवेत्।**

**स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति।। ६.११.१ ।।**

**अस्य** हे **सोम्य** **महतः** अनेक-शाखादि-युक्तस्य **वृक्षस्य**। अस्य इति अग्रतः स्थितं वृक्षं दर्शयन् आह।

यदि **यः** कश्चित् अस्य **मूले** **अभ्याहन्यात्** परश्वादिना सकृद् घात-मात्रेण न शुष्यति इति **जीवन्** एव भवति, तदा तस्य रसः **स्रवेत्**। तथा **यो** **मध्ये** **अभ्याहन्यात्** **जीवन्** **स्रवेत्**। तथा **यः** **अग्रे** **अभ्याहन्यात्** **जीवन्** **स्रवेत्**।

**स** **एषः** वृक्षः इदानीं **जीवेन** **आत्मना** **अनुप्रभूतः** अनुव्याप्तः **पेपीयमानः** अत्यर्थं पिबन् उदकं भौमांश्च रसान्

मूलैः गृह्णन् **मोदमानः** हर्षं प्राप्नुवन् **तिष्ठति**।। १ ।।

**अस्य यदेकाँ्शाखां जीवो जहात्यथ सा शुष्यति। द्वितीयां जहात्यथ सा शुष्यति।**

**तृतीयां जहात्यथ सा शुष्यति। सर्वं जहाति सर्वः शुष्यति।। ६.११.२ ।।**

तस्य **अस्य** **यदेकां** **शाखां** रोग-ग्रस्तां आहतां वा **जीवः** **जहाति** उपसंहरति शाखायां विप्रसृतम् आत्मांशम्।

अथ सा शुष्यति। वाङ्-मनः-प्राण-करण-ग्रामानुप्रविष्टः हि जीवः इति, तदुपसंहारे उपसंह्रियते।

जीवेन च प्राण-युक्तेन अशितं पीतं च रसतां गतं जीवच्छरीरं वृक्षं वर्धयद्रस-रूपेण जीवस्य सद्भावे लिङ्गं

भवति। अशित-पीताभ्यां हि देहे जीवस्तिष्ठति। ते च अशित-पीते जीव-कर्मानुसारिणी इति।

तस्य एकाङ्ग-वैकल्य-निमित्तं कर्म यदोपस्थितं भवति तदा जीवः एकां शाखां जहाति, शाखायाः आत्मानम्

उपसंहरति।

**अथ** तदा **सा** शाखा **शुष्यति**। जीव-स्थिति-निमित्तः रसः जीव-कर्माक्षिप्तः जीवोपसंहारे न तिष्ठति।

रसापगमे च शाखा शोषमुपैति। तथा **सर्वं** वृक्षमेव यदा अयं **जहाति** तदा **सर्वः** अपि वृक्षः **शुष्यति**।

वृक्षस्य रस-स्रवण-शोषणादि-लिङ्गात् जीववत्त्वं[23], दृष्टान्त-श्रुतेश्च[24], चेतनावन्तः स्थावराः इति।

बौद्ध-काणाद-मतम् अचेतनाः स्थावराः इत्येतत् असारम् इति दर्शितं भवति।। २ ।।

---

[23] वृक्षः चेतनावान् रसस्रावेण शोषणछिन्नप्ररोहणादिमत्वात् मनुष्यदेहवत् इति।

[24] स एषः (वृक्षः) जीवेन आत्मना अनुप्रभूतः इति अस्मिन् मन्त्रे।

यथा अस्मिन् वृक्ष-दृष्टान्ते दर्शितं जीवेन युक्तः वृक्षः अशुष्कः रस-पानादि-युक्तः जीवति इति उच्यते, तदपेतश्च

म्रियते इति उच्यते -

**एवमेव खलु सोम्य विद्धीति होवाच जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते इति। स य एषोऽणिमा। ऐतदात्म्यमिदँ्सर्वम्। तत्सत्यँ्स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच।। ६.११.३ ।।**

**एवमेव खलु सोम्य विद्धीति होवाच** - **जीवापेतं** जीव-वियुक्तं **वाव किल इदं** शरीरं **म्रियते न जीवः म्रियते**

इति। कार्य-शेषे च सुप्तोत्थितस्य 'मम इदं कार्य-शेषं अपरिसमाप्तम्' इति स्मृत्वा समापन-दर्शनात्।

जात-मात्राणां च जन्तूनां स्तन्याभिलाष-भयादि-दर्शनाच्च अतीत-जन्मान्तरानुभूत-स्तन्य-पान-दुःखानुभव-स्मृतिः

गम्यते। अग्निहोत्रादीनां च वैदिकानां कर्मणाम् अर्थवत्वाद् न जीवः म्रियते इति।

**स य एषोऽणिमा** इत्यादि समानम्।

कथं पुनः इदम् अत्यन्त-स्थूलं पृथिव्यादि नाम-रूपवज्जगत् अत्यन्त-सूक्ष्मात् सद्रूपात् नाम-रूप-रहितात् सतः

जायते इत्येतत् दृष्टान्तेन **भूय एव मा भगवान् विज्ञापयतु** इति। **तथा सोम्य इति होवाच** पिता।। ३ ।।

द्वादशः खण्डः

यदि एतत् प्रत्यक्षी-कर्त्तुमिच्छसि -

**न्यग्रोधफलमत आहरेति। इदं भगव इति। भिन्धीति। भिन्नं भगव इति। किमत्र पश्यसीति। अण्व्यः इवेमा धाना भगव इति। आसामङ्गैकां भिन्धीति। भिन्ना भगव इति। किमत्र पश्यसीति। न किञ्चन भगव इति।। ६.१२.१ ।।**

**अतः** अस्मात् महतः **न्यग्रोधात् फलम्** एकम् **आहर इति** उक्तः तथा चकार।

स **इदं भगव** उपहृतं फलम् **इति** दर्शितवन्तं प्रत्याह फलं **भिन्धि इति**। **भिन्नं इति** आह इतरः।

तमाह पिता **किमत्र पश्यसि? इति** उक्तः आह **अण्व्यः** अणुतराः **इव इमाः धानाः** बीजानि पश्यामि **भगव** इति।

**आसाम्** धानानाम् **एकां** धानाम् **अङ्ग** हे वत्स **भिन्धि**। **इति** उक्तः आह **भिन्ना भगव इति**।

यदि भिन्ना धाना तस्यां भिन्नायां **किं पश्यसि?** इति उक्तः आह **न किञ्चन** पश्यामि **भगव इति**।। १ ।।

**तँ होवाच यं वै सोम्यैतमणिमानं न निभालयसे एतस्य वै सोम्यैषोऽणिम्नः एवं महान् न्यग्रोधस्तिष्ठति। श्रद्धत्स्व सोम्य इति।। ६.१२.२ ।।**

**तं** पुत्रं **होवाच** वट-धानायां भिन्नायां **यं** वट-बीज-**अणिमानं** हे **सोम्य एतं न निभालयसे** न पश्यसि, तथापि **एतस्य वै** किल **सोम्य एषः महान् न्यग्रोधः** बीजस्य **अणिम्नः** सूक्ष्मस्य अदृश्यमानस्य कार्य-भूतः स्थूल-शाखा-स्कन्ध-फल-पलाशवान् **तिष्ठति** उत्पन्नः सन्, उत्तिष्ठति इति वा उच्छब्दः अध्याहार्यः।

अतः **श्रद्धत्स्व सोम्य** सतः एव अणिम्नः स्थूलं नाम-रूपादिमत्कार्यं जगद् उत्पन्नम् **इति**। यद्यपि न्यायागमाभ्यां निर्धारितः अर्थः तथैव इत्यवगम्यते, तथापि अत्यन्त-सूक्ष्मेषु अर्थेषु बाह्य-विषयासक्त-मनसः स्वभाव-प्रवृत्तस्य असत्यां गुरुतरायां श्रद्धायां दुरवगमत्वं स्यादित्याह - श्रद्धत्स्व इति। श्रद्धायां तु सत्यां मनसः समाधानं बुभुत्सिते

अर्थे भवेत्, ततश्च तदर्थावगतिः। “अन्यत्र मनाः अभूवम्” (बृ. १.५.३) इत्यादि श्रुतेः।। २ ।।

**स य एषोऽणिमा। ऐतदात्म्यमिदँ सर्वम्।**

**तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति।**

**भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच।। ६.१२.३।।**

**स य** इत्यादि उक्तार्थम्। यदि तत् सद् जगतो मूलं, कस्मान्नोपलभ्यते इत्येतत् दृष्टान्तेन **मा भगवान् भूय एव विज्ञापयतु** इति। **तथा सोम्य इति होवाच** पिता।। ३ ।।

त्रयोदशः खण्डः

विद्यमानमपि वस्तु नोपलभ्यते, प्राकारान्तरेण तु उपलभ्यते इति शृणु अत्र दृष्टान्तं, यदि च इमम् अर्थं

प्रत्यक्षीकर्त्तुम् इच्छसि -

**लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति। स ह तथा चकार। तँ होवाच**

**यद्दोषा लवणमुदकेऽवाधा अङ्ग तदाहरेति। तद्धावमृश्य न विवेद।। ६.१३.१ ।।**

पिण्ड-रूपं **लवणमेतद्** घटादौ **उदके** **अवधाय** प्रक्षिप्य **अथ** **मा** मां श्वः **प्रातर्** **उपसीदथाः** उपगच्छेथाः **इति**।

**स** ह पित्रा उक्तमर्थं प्रत्यक्षी-कर्त्तुम् इच्छन् **तथा** **चकार**। **तं** **होवाच** परेद्युः प्रातर् **यद्** लवणम् **दोषा** रात्रौ **उदके**

**अवाधाः** निक्षिप्तवानसि **अङ्ग** हे वत्स **तदाहर**। **इति** उक्तः **तद्** लवणम् आजिहीर्षुः **ह** किल **अवमृश्य** उदके **न**

**विवेद** न विज्ञातवान्, यथा तल्लवणं विद्यमानमेव सदप्सु लीनं संश्लिष्टमभूत्।। १ ।।

**यथा विलीनमेवाङ्गास्यान्तादाचामेति। कथमिति। लवणमिति। मध्यादाचामेति।**

**कथमिति। लवणमिति। अन्तादाचामेति, कथमिति। लवणमिति।**

**अभिप्रास्यैतदथ मोपसीदथा इति। तद्ध तथा चकार। तच्छश्वत् संवर्त्तते।**

**तँ होवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किल इति।। ६.१३.२ ।।**

**यथा** **विलीनं** लवणं न वेत्थ तथापि, तच्चक्षुषा स्पर्शनेन च पिण्ड-रूपं लवणम् अगृह्यमाणं विद्यते **एव** अप्सु, उपलभ्यते च उपायान्तरेण - इत्येतत् पुत्रं प्रत्याययितुम् इच्छन् आह - **अङ्ग** **अस्य** उदकस्य **अन्तात्** उपरि गृहीत्वा **आचाम** **इति** उक्त्वा पुत्रं तथा कृतवन्तं उवाच **कथमिति**। इतरः आह **लवणं** स्वादुतः **इति**। तथा **मध्यात्** उदकस्य गृहीत्वा **आचाम** **इति**। **कथमिति**। **लवणमिति**। तथा **अन्तात्** अधोदेशात् गृहीत्वा **आचाम** **इति**। **कथमिति**। **लवणमिति**। यदि एवम्, **अभिप्रास्य** परित्यज्य **एतत्** उदकम्, आचम्य, **अथ** **मा** मां

**उपसीदथाः** **इति**। **तद्** **ह** **तथा** **चकार**। लवणं परित्यज्य पितृ-समीपम् आजगाम इत्यर्थः, इदं वचनं ब्रुवन्, '**तत्** लवणं तस्मिन्नेव उदके यन्मया रात्रौ क्षिप्तं **शश्वत्** नित्यं **संवर्त्तते** विद्यमानमेव सत् सम्यग् वर्त्तते' इति। एवम् उक्तवन्तं **तं** **होवाच** पिता। यथा इदं लवणं दर्शन-स्पर्शनाभ्यां पूर्वं गृहीतं पुनर् उदके विलीनं ताभ्याम् अगृह्यमाणमपि विद्यते एव, उपायान्तरेण जिह्वया उपलभ्यमानत्वात्। एवमेव **अत्र** एव अस्मिन्नेव तेजोबन्नादि-कार्ये शुङ्गे देहे। **वाव**, **किल**, इति आचार्योपदेश-स्मरण-प्रदर्शनार्थौ। **सत्** तेजोबन्नादि-शुङ्ग-कारणं, वट-बीजाणिमवत् विद्यमानमेव इन्द्रियैः न उपलभसे **न** **निभालयसे**। यथा अत्रैव उदके दर्शन-स्पर्शनाभ्याम् अनुपलभ्यमानं लवणं विद्यमानमेव जिह्वया उपलब्धवानसि, एवम् एव **अत्रैव** **किल** विद्यमानं सत् जगन्मूलम् उपायान्तरेण लवणाणिमवत् उपलप्स्यसे **इति** वाक्य-शेषः।। २ ।।

**स य एषोऽणिमा। ऐतदात्म्यमिदँ सर्वम्।**

**तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान् विज्ञापयत्विति।**

**तथा सोम्येति होवाच।। ६.१३.३।।**

**स य** इत्यादि समानम्। यदि एवं लवणाणिमवत् इन्द्रियैः अनुपलभ्यमानमपि जगन्मूलं सद् उपायान्तरेण उपलब्धुं

शक्यते, यदुपलम्भात् कृतार्थः स्याम्, अनुपलम्भाच्च अकृतार्थः स्याम् अहं, तस्यैव उपलब्धौ कः उपायः इत्येतत्

**भूय एव मा भगवान् विज्ञापयतु** दृष्टान्तेन। **तथा सोम्य इति होवाच**।। ३ ।।

चतुर्दशः खण्डः

**यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत् स यथा तत्र प्राङ्वोदङ्वाधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः।। ६.१४.१ ।।**

**यथा** लोके हे **सोम्य** **पुरुषं** यं कश्चित् **गन्धारेभ्यः** जनपदेभ्यः **अभिनद्धाक्षं** बन्ध-चक्षुषम् **आनीय** द्रव्य-हर्त्ता तस्करः **तं** अभिनद्धाक्षम् एव बद्ध-हस्तम् अरण्ये **ततः** अपि **अतिजने** अतिगत-जने अत्यन्त-विगत-जने देशे **विसृजेत्**। **स** **तत्र** दिग्भ्रमोपेतः **यथा** **प्राङ्** **वा** प्रागञ्चनः प्राङ्मुखो वा इत्यर्थः। तथा **उदङ्** **वा** **अधराङ्** **वा** **प्रत्यङ्** **वा** **प्रध्मायीत** शब्दं कुर्यात्, विक्रोशेत्, "**अभिनद्धाक्षः** अहं गन्धारेभ्यः तस्करेण **आनीतः**, **अभिनद्धाक्षः** एव **विसृष्टः**" इति।। १ ।।

एवं विक्रोशतः -

**तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धाराः, एतां दिशं व्रजेति। स ग्रामाद् ग्रामं पृच्छन्, पण्डितो मेधावी गन्धारानेवोपसम्पद्येत। एवमेवेहाचार्यवान् पुरुषो वेद। तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये**[25] **इति।। ६.१४.२ ।।**

**तस्य यथा अभिनहनं** यथा बन्धनं **प्रमुच्य** मुक्त्वा कारुणिकः कश्चित् **"एतां दिशं** उत्तरतः **गन्धाराः एतां दिशं व्रज" इति प्रब्रूयात्**। **सः** एवं कारुणिकेन बन्धनान्मोक्षितः **ग्रामात्** ग्रामान्तरं **पृच्छन् पण्डितः** उपदेशवान् **मेधावी** परोपदिष्ट-ग्राम-प्रवेश-मार्गावधारण-समर्थः सन् **गन्धारान् एव उपसम्पद्येत** न इतरः मूढमतिः, देशान्तर-दर्शन-तृड् वा। यथा अयं दृष्टान्तः वर्णितः, स्व-विषयेभ्यः गन्धारेभ्यः पुरुषः तस्करैः अभिनद्धाक्षः, अविवेकः दिङ्मूढः, अशनाया-पिपासादिमान्, व्याघ्र-तस्कराद्यनेक-भयानर्थ-व्रात-युतम् अरण्यं प्रवेशितः, दुःखार्त्तः

---

[25] जीवन्मुक्तिविषये ब्रह्मसूत्रम् ४.१.१५।

विक्रोशन् बन्धनेभ्यः मुमुक्षुः तिष्ठति।

स कथञ्चिदेव कारुणिकेन केनचिन्मोक्षितः स्वदेशान् गन्धारान् एवापन्नः, निर्वृतः सुखी अभूत्।

**एवमेव** सतः जगदात्मनः स्वरूपात्[26] तेजोबन्नादिमयं देहारण्यं वात-पित्त-कफ-रुधिर-मेदो-मांसास्थि-मज्ज्ञा-शुक्र-कृमि-मूत्र-पुरीषवत्, शीतोष्णाद्यनेक-द्वन्द्व-सुख-दुःखवच्च इदं, मोह-पटाभिनद्धाक्षः, भार्या-पुत्र-मित्र-पशु-बन्ध्वादि-दृष्टादृष्टानेक-विषय-तृष्णा-पाशितः, पुण्यापुण्यादि-तस्करैः प्रवेशितः, 'अहम् अमुष्य पुत्रः', 'मम एते बान्धवाः', 'सुखी अहम्', 'दुःखी', 'मूढः', 'पण्डितः', 'धार्मिकः', 'बन्धुमान्', 'जातः', 'मृतः', 'जीर्णः', 'पापी', 'पुत्रो मे मृतः', 'धनं मे नष्टं', 'हा हतोस्मि', 'कथं जीविष्यामि?', 'का मे गतिः?', 'किं मे त्राणम्?' इत्येवम् अनेक-शत-सहस्रानर्थ-जालवान् विक्रोशन्, कथञ्चिदेव पुण्यातिशयात् परम-कारुणिकं कञ्चित्

---

[26] जगदात्मस्वरूपादिति वा।

सद्ब्रह्मात्मविदं विमुक्त-बन्धनं ब्रह्मिष्ठं यदा आसादयति, तेन च ब्रह्म-विदा कारुण्याद्दर्शित-संसार-विषय-दोष-दर्शन-मार्गः, विरक्तः संसार-विषयेभ्यः 'नासि त्वं संसारी, अमुष्य पुत्रत्वादि धर्मवान्', किं तर्हि, 'सद् यत् तत्त्वमसि' इति अविद्या-मोह-पटाभिनहनान्मोक्षितः, गन्धार-पुरुषवत्, स्वं सदात्मानम् उपसम्पद्य, सुखी, निर्वृतः स्यादित्येतमेव अर्थम् आह - **आचार्यवान् पुरुषो वेद** इति।

**तस्य** अस्य एवम् आचार्यवतः मुक्ताविद्याभिनहनस्य **तावदेव** तावानेव कालः **चिरं** क्षेपः। सदात्म-स्वरूप-सम्पत्तेः इति वाक्य-शेषः।

कियान् कालः चिरम्? इत्युच्यते - **यावन्न विमोक्ष्ये** न विमोक्ष्यते इत्येतत्, पुरुष-व्यत्ययेन, सामर्थ्यात्[27]। येन कर्मणा शरीरम् आरब्धं तस्य उपभोगेन क्षयात् देहपातो यावदित्यर्थः[28]।

---

[27] अस्मदि उपपदे असति।

**अथ** तदा एव, सत् **सम्पत्स्ये** सम्पत्स्यते इति पूर्ववत्[29]।

न हि देह-मोक्षस्य सत्सम्पत्तेः च कालभेदः अस्ति, येन अथ शब्दः आनन्तर्यार्थः स्यात्।

**जीवन्मुक्ति-अनङ्गीकर्त्तुः चोद्यम्**
**आक्षेपः**

ननु[30] यथा सद्विज्ञानानन्तरमेव 'देहपातः, सत्सम्पत्तिश्च', न भवति कर्म-शेष-वशात्, तथा अप्रवृत्त-फलानि प्राग् ज्ञानोत्पत्तेः[31], जन्मान्तर-सञ्चितान्यपि कर्माणि सन्ति इति तत्फलोपभोगार्थं पतिते अस्मिन् शरीरान्तरम् आरब्धव्यम्।

उत्पन्ने च ज्ञाने यावज्जीवं विहितानि प्रतिषिद्धानि वा कर्माणि करोत्येव इति तत्फलोपभोगार्थं च अवश्यं

---

[28] न शरीरमनाश्रित्य ज्ञानोत्पत्तिः संभवति । शरीरं च न कर्मणा विना इति कर्मणां प्रवृत्तफलत्वात् वेगक्षयात् पूर्वं न निवृत्तिः इति।

[29] पुरुषव्यत्ययेन।

[30]यदि प्रारब्धकर्मणा ज्ञानं प्रतिबध्य कार्यं क्रियते तर्हि सञ्चितमपि कर्म तथा स्यात्कर्मत्वाविशेषादिति शङ्का।

[31] एतत् जन्मनि सञ्चितानि इति शेषः।

शरीरान्तरम् आरब्धव्यम्। ततश्च कर्माणि, ततः शरीरान्तरम्, इति ज्ञानानर्थक्यम्, कर्मणां फलवत्वात्। अथ ज्ञानवतः क्षीयन्ते कर्माणि तदा ज्ञान-प्राप्ति-सम-कालमेव ज्ञानस्य सत्सम्पत्ति-हेतुत्वान्मोक्षः स्यादिति शरीरपातः स्यात्। तथा च आचार्याभावः इति "आचार्यवान् पुरुषो वेद" इति आचार्यवत्त्वानुपपत्तिः, ज्ञानान्मोक्षाभाव-प्रसङ्गश्च। देशान्तर-प्राप्त्युपाय-ज्ञानवत् अनैकान्तिक-फलत्वं[32] वा ज्ञानस्य।।

**समाधानम्**

न। कर्मणां प्रवृत्ताप्रवृत्त-फलवत्त्व-विशेषोपपत्तेः। यदुक्तम् अप्रवृत्त-फलानां कर्मणां ध्रुव-फलवत्त्वात्, ब्रह्म-विदः शरीरे पतिते शरीरान्तरमारब्धव्यम् अप्रवृत्त-कर्म-फलोपभोगार्थम् इत्येतदसत्।

---

[32] ग्रामप्राप्त्युपायः अश्वः रथः वा इति ज्ञाने सति, असति अन्तराये ग्रामप्राप्तिः इति अनियतफलत्वम्।

विदुषः "तस्य तावदेव चिरम्" इति श्रुतेः प्रामाण्यात्[33]।

**आक्षेपः**

ननु "पुण्यो वै पुण्येन कर्मणा भवति" (बृ. ३.२.१३) इत्यादि-श्रुतेरपि प्रामाण्यमेव।

**समाधानम्**

सत्यमेवम्। तथापि[34] प्रवृत्त-फलानाम् अप्रवृत्त-फलानां च कर्मणां विशेषः अस्ति।

कथम्? यानि प्रवृत्त-फलानि कर्माणि, यैः विद्वच्छरीरमारब्धं, तेषाम् उपभोगेन एव क्षयः।

यथा आरब्ध-वेगस्य लक्ष्य-मुक्तेष्वादेः वेग-क्षयादेव स्तिथिः, न तु लक्ष्य-वेध-सम-कालमेव प्रयोजनं नास्ति इति[35] तद्वत्। अन्यानि तु अप्रवृत्त-फलानि, इह प्राग् ज्ञानोत्पत्तेः ऊर्ध्वं च कृतानि वा क्रियमाणानि वा, अतीत-जन्मान्तर-कृतानि वा अप्रवृत्त-फलानि ज्ञानेन दह्यन्ते, प्रायश्चित्तेन इव।

---

[33] शरीर-पात-पर्यन्तं विलम्बोक्तया तत्-शरीरारम्भकाणामारब्धफलानाम् अनिवृत्तिः, तावदेव इति एवकारेण च अनन्तरं विलम्बाभावोक्त्या शरीरान्तरारम्भकाणां इतरकर्मणां निवृत्तिः च गम्यते।

[34] सत्यमेवमिति अविद्वद्विषयतया उदाहृतश्रुतिं व्याख्येय विद्वद्विषये तन्निराकरोति।

[35] इष्वादेः स्तिथिः भवति, किन्तु तेषां प्रयोजनानन्तराभावेऽपि वेगक्षयपर्यन्तं देशान्तरगमनं दृश्यते।

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा" (गी ४.३७) इति स्मृतेः च। "क्षीयन्ते चास्य कर्माणि" (मु. २.२.८) इति च आथर्वणे। अतः ब्रह्मविदः जीवनादि-प्रयोजनाभावेऽपि प्रवृत्त-फलानां कर्मणामवश्यमेव फलोपभोगः स्यादिति, मुक्तेषुवत् "तस्य तावदेव चिरम्" इति युक्तमेवोक्तम् इति यथोक्त-दोष-चोदनानुपपत्तिः।

ज्ञानोत्पत्तेः ऊर्ध्वं च ब्रह्मविदः कर्माभावम् अवोचाम - "(सर्वे एते पुण्यलोकाः भवन्ति) ब्रह्मसंस्थः अमृतत्वमेति" (छा. २.२३.१)[36] इत्यत्र। तच्च स्मर्त्तुमर्हसि।। २ ।।

---

[36] तत्रस्थ भाष्यम् - ब्रह्मणि सम्यक् स्थितः सः अमृतत्वं पुण्यलोकविलक्षणम् अमरण-भावम् आत्यन्तिकम् एति, न आपेक्षिकं देवाद्यमृतत्ववत्। पुण्यलोकात् पृथक् अमृतत्वस्य विभागकरणात्।

**स य एषोऽणिमा। ऐतदात्म्यमिदँ् सर्वम्। तत्सत्यँ् स आत्मा तत्त्वमसि श्वेतकेतो**

**इति। भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच।। ६.१४.३।।**

**स य** इत्यादि उक्तार्थम्। आचार्यवान् विद्वान् येन क्रमेण सत् सम्पद्यते तं क्रमं दृष्टान्तेन **भूय एव मा भगवान्**

**विज्ञापयतु** इति। **तथा सोम्य इति होवाच**।। ३ ।।

पञ्चदशः खण्डः

**पुरुषँ्सोम्योतोपतापिनं ज्ञातयः पर्युपासते, जानासि मां, जानासि मामिति। तस्य यावन्न वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्ञानाति।। ६.१५.१ ।।**[37]

**पुरुषं** हे **सोम्य** **उत** **उपतापिनं** ज्वराद्युपतापवन्तं **ज्ञातयः** बान्धवाः परिवार्य **उपासते** मुमूर्षुम् - '**जानासि** **मां** तव पितरं, पुत्रं, भ्रातरं वा' **इति** पृच्छन्तः।

**तस्य** मुमूर्षोः **यावत्** **न** **वाक्** **मनसि** **सम्पद्यते**, **मनः** **प्राणे**, **प्राणस्तेजसि**, **तेजः** **परस्यां** **देवतायाम्** इत्येतत् उक्तार्थम्।। १ ।।

[37] पूर्वं स्वप्नखण्डिकायां मरणकाले यस्मिन् सति सम्पद्यते विद्वान् अविद्वान् च, तथाविधं सदात्मत्वमस्ति जीवस्य स्वरूप-भूतमिति वक्तुं मरणक्रम उक्तः। इदानीं तु विदुष इहैव सत्सम्पत्तिः, न अर्चिरादिक्रमेणेति वक्तुमिति न पुनरुक्तिदोषायेति भावः। अयं चार्थविशेषः अस्यामेव खण्डिकायां अथ न जानाति इति विशेष-विज्ञानाभावोक्तिद्वारा सर्वव्यवहाराभावोक्तेः लभ्यते।

संसारिणो यो मरण-क्रमः[38] स एवायं विदुषोऽपि सत्सम्पत्ति-क्रमः इत्येतदाह -

**अथ यदा अस्य वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति।। ६.१५.२ ।।**

परस्यां देवतायां तेजसि सम्पन्ने **अथ न जानाति**।

अविद्वांस्तु सतः उत्थाय प्राग्भावितं व्याघ्रादि-भावं देव-मनुष्यादि-भावं वा विशति।

विद्वांस्तु शास्त्राचार्योपदेश-जनित-ज्ञान-दीप-प्रकाशितं सद्ब्रह्मात्मानं प्रविश्य नावर्त्तते इत्येषः सत्सम्पत्ति-क्रमः।

अन्ये तु मूर्धन्यया नाड्योत्क्रम्य आदित्यादि-द्वारेण सद् गच्छन्ति इत्याहुः, तदसत्।

---

[38] ननु विदुषः मरणक्रमे पृष्टे संसारि-मरणक्रम एवोच्यते तदयुक्तम्, मरणक्रमविशेषाभावे मुक्तिलक्षणफल-विशेषः न स्यादित्याशङ्क्य, विद्याविशेषकृत एव फलविशेषः न मरणक्रमविशेषकृत इत्याह - संसारिण इति।

देश-काल-निमित्त-फलाभिसन्धानेन गमन-दर्शनात्।

न हि सदात्मैकत्व-दर्शिनः सत्याभिसन्धस्य देश-काल-निमित्त-फलाद्यनृताभिसन्धिः उपपद्यते। विरोधात्।

अविद्या-काम-कर्मणां च गमन-निमित्तानां सद्विज्ञान-हुताशन-विप्लुष्टत्वात्[39] गमनानुपपत्तिरेव।

**“**पर्याप्त-कामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः**”** (मु. ३.२.२) इति आथर्वणे।

नदीसमुद्र-दृष्टान्त-श्रुतेः[40] च।। २ ।।

---

[39] प्लुष् १प, ४प ,९प दहने।

[40] प्रश्न-(दृष्टान्त)-श्रुतिः (प्र.उप ६-५) ‘स यथा इमाः नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्य अस्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्रः इत्येवं प्रोच्यते, एवमेव अस्य परिद्रष्टुः इमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्य अस्तं गच्छन्ति भिद्येते च आसां नामरूपे पुरुष इत्येवं प्रोच्यते इति। मुण्डक-(दृष्टान्त)-श्रुतिः ३-२-८। यथा नद्यः स्यन्दमानाः समुद्रे, अस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान् नामरूपाद् विमुक्तः, परात्परं पुरुषं उपैति दिव्यम्।।

**स य एषोऽणिमा। ऐतदात्म्यमिदँ्सर्वम्।**

**तत्सत्यँ्स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान् विज्ञापयत्विति।**

**तथा सोम्येति होवाच।। ६.१५.३।।**

**स यः** इत्यादि समानम्। यदि मरिष्यतः मुमुक्षतः च तुल्या सत्सम्पत्तिः, तत्र विद्वान् सत्सम्पन्नः न आवर्त्तते, आवर्त्तते तु अविद्वान् इत्यत्र कारणं दृष्टान्तेन **भूय एव मा भगवान् विज्ञापयतु** इति। **तथा सोम्य इति होवाच**।। ३ ।।

षोडशः खण्डः

श्रृणु, यथा -

**पुरुष ँ्सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति।**

**स यदि तस्य कर्त्ता भवति तत एवानृतमात्मानं कुरुते।**

**सोऽनृताभिसन्धोऽ-नृतेनात्मानमन्तर्धाय, परशुं तप्तं प्रतिगृह्णाति।**

**स दह्यतेऽथ हन्यते।। ६.१६.१ ।।**

**सोम्य** **पुरुषं** चौर्य-कर्मणि सन्दिह्यमानं, निग्रहाय परीक्षणाय वा **उत** अपि **हस्तगृहीतं** बद्ध-हस्तम् **आनयन्ति** राजपुरुषाः। किं कृतवान् अयमिति पृष्टाश्च आहुः **अपहार्षीत्** धनम् अस्य अयम्। ते च आहुः किम् अपहरणमात्रेण बन्धनम् अर्हति? अन्यथा दत्तेऽपि धने बन्धन-प्रसङ्गात्, इत्युक्ताः, पुनः आहुः **स्तेयम्** **अकार्षीत्**

चौर्येण धनम् अपहार्षीदिति।

तेषु एवं वदत्सु इतरः अपह्नुते[41] ‘नाहं तत्कर्त्ता’ इति।

ते च आहुः ‘सन्दिह्यमानं स्तेयम् अकार्षीः त्वम् अस्य धनस्य’ इति। तस्मिन् च अपह्नुवाने, आहुः ‘**परशुम् अस्मै तपत**’[42] **इति**, शोधयतु आत्मानम् इति। **स यदि तस्य** स्तैन्यस्य **कर्त्ता भवति** बहिः च अपह्नुते, स एवंभूतः **तत एव अनृतम्** अन्यथा-भूतं सन्तमन्यथा **आत्मानं कुरुते**।

**सः** तथा **अनृताभिसन्धः अनृतेन आत्मानम् अन्तर्धाय** व्यवहितं कृत्वा **परशुं तप्तं** मोहात् **प्रतिगृह्णाति**, **स दह्यते**।

---

[41] अप-ह्नु २आ to deny or disown।

[42] लोट् मध्यमपुरुषः बहुवचनम्।

**अथ** **हन्यते** राजपुरुषैः स्वकृतेन अनृताभि-सन्धि-दोषेण।। १ ।।

**अथ यदि तस्याकर्त्ता भवति, तत एव सत्यमात्मानं कुरुते। स सत्याभिसन्धः सत्येन आत्मानमन्तर्धाय, परशुं तप्तं प्रतिगृह्णाति। स न दह्यतेऽथ मुच्यते।। ६.१६.२ ।।**

**अथ** **यदि** **तस्य** कर्मणः **अकर्त्ता** **भवति**, **तत** **एव** **सत्यम्** **आत्मानं** **कुरुते**। **स** **सत्येन** तया स्तैन्याकर्त्तृतया **आत्मानम्** **अन्तर्धाय**, **परशुं** **तप्तं** **प्रतिगृह्णाति**। स **सत्याभिसन्धः** सन् **न** **दह्यते**, सत्य-व्यवधानात्[43] **अथ** **मुच्यते** च मृषाऽभियोक्तृभ्यः। तप्त-परशु-हस्त-तल-संयोगस्य तुल्यत्वेऽपि स्तेय-कर्त्रकर्त्रोः, अनृताभिसन्धः दह्यते, न तु सत्याभिसन्धः।।२।।

43 सत्येन व्यवहित-हस्त-तलत्वात्।

**स यथा तत्र नादाह्येत। [44]ऐतदात्म्यमिदँ्सर्वं तत्सत्यँ्स आत्मा तत्त्वमसि**

**श्वेतकेतो इति। तद्धास्य विजज्ञाविति विजज्ञाविति।। ६.१६.३।।**

## इति छान्दोग्योपनिषदि षष्ठोऽध्यायः

**स यथा** सत्याभिसन्धः तप्त-परशु-ग्रहण-कर्मणि सत्य-व्यवहित-हस्त-तलत्वाद् **नादाह्येत**[45]। न दह्येत इत्येतत्। एवं सद्ब्रह्म-सत्याभिसन्धीतरयोः शरीर-पात-काले च तुल्यायां सत्सम्पत्तौ, विद्वान् सत्सम्पद्य न पुनः व्याघ्र-देवादि-देह-ग्रहणाय आवर्त्तते, अविद्वान् तु विकारानृताभिसन्धः पुनः व्याघ्रादि-भावं देवतादि-भावं वा "यथाकर्म यथाश्रुतम्" (क. २.२.१७) प्रतिपद्यते।।

यदात्माभिसन्ध्यनभिसन्धि-कृते मोक्ष-बन्धने, यच्च मूलं जगतः, यदायतनाः, यत्प्रतिष्ठाः च सर्वाः प्रजाः, यदात्मकं च सर्वं, यच्च अजम्, अमृतम् अभयं, शिवम्, अद्वितीयं **तत् सत्यं स आत्मा** तव।

---

[44] तथा अथ मुच्यते। स य एषोऽणिमा.. इत्यधिकं कैलासाश्रमपाठे।

[45] दैर्घ्यं छान्दसम्।

अतः "**तत्वमसि** हे **श्वेतकेतो**" इति उक्तार्थम् असकृद्वाक्यम्।।

कः पुनः असौ श्वेतकेतुः त्वं शब्दार्थः? "योहं श्वेतकेतुः उद्दालकस्य पुत्रः इति वेद आत्मानम्, आदेशं श्रुत्वा, मत्वा, विज्ञाय च अश्रुतम् अमतम् अविज्ञातं विज्ञातुं पितरं पप्रच्छ, कथं नु भगवः स आदेशः भवति इति" सः एषः, अधिकृतः, श्रोता मन्ता विज्ञाता, तेजोबन्नमयं कार्यकारण-सङ्घातं प्रविष्टा परा एव देवता नाम-रूप-व्याकरणाय, आदर्शे इव पुरुषः, सूर्यादिः इव जलादौ प्रतिबिम्ब-रूपेण।

स आत्मानं कार्य-करणेभ्यः प्रविभक्तं सद्रूपं सर्वात्मानं प्राक् पितुः श्रवणान्न विजज्ञौ।

अथ इदानीं पित्रा प्रतिबोधितः 'तत्वमसि' इति दृष्टान्तैः हेतुभिश्च **तत्** पितुः अस्य **ह** किल उक्तं 'सदेव अहमस्मि' इति **विजज्ञौ** विज्ञातवान्। द्विर्वचनम् अध्याय-परिसमाप्त्यर्थम्।।

किं[46] पुनः अत्र षष्ठे वाक्य-प्रमाणेन जनितं फलम्? आत्मनि कर्त्तृत्व-भोक्तृत्त्वयोः अधिकृतत्व-विज्ञान-निवृत्तिः तस्य फलं, यमवोचाम त्वं शब्द-वाच्यम् अर्थं श्रोतुं मन्तुं च अधिकृतम् अविज्ञात-विज्ञान-फलार्थम्[47]। प्राक् च एतस्मात् विज्ञानात् 'अहमेवं करिष्यामि अग्निहोत्रादीनि कर्माणि', 'अहमत्र अधिकृतः', 'एषां च कर्मणां फलम् इह अमुत्र च भोक्ष्ये', 'कृतेषु वा कर्मसु कृतकर्त्तव्यः स्याम्' - इत्येवं कर्त्तृत्व-भोक्तृत्त्वयोः अधिकृतः अस्मि इति आत्मनि यद्विज्ञानमभूत् तस्य, 'यत्सज्जगतः मूलम् एकमेवाद्वितीयं तत्त्वमसि' इत्यनेन वाक्येन प्रतिबुद्धस्य, निवर्त्तते। विरोधात्। न हि एकस्मिन् अद्वितीये आत्मनि 'अयमहमस्मि' इति विज्ञाते 'मम इदम् अन्यत्', 'अनेन कर्त्तव्यम् इदम्', 'कृत्वा अस्य फलं भोक्ष्ये' इति वा भेद-विज्ञानमुपपद्यते। तस्मात् सत्सत्याद्वितीयात्म-विज्ञाने विकारानृत-जीवात्म-विज्ञानं निवर्त्तते इति युक्तम्।।

---

[46] अज्ञातार्थ-प्रकाशनं मानफलं, तस्य स्वप्रकाशे ब्रह्मणि नोपपत्तिरिति मन्वानः चोदयति - किमिति।

[47] अविज्ञात-ज्ञान-लक्षण-फलार्थं श्रोतुं मन्तुञ्च अधिकृतं यं त्वंशब्दवाच्यम् अर्थम् अवोचाम 'योहं श्वेतकेतुः' इत्यादिना, तस्य आत्मनि कर्त्तृत्वादिज्ञाननिवृत्तिः फलमिति पूर्वेण अन्वयः।

**आक्षेपः**

ननु 'तत्त्वमसि' इत्यत्र त्वं-शब्द-वाच्येऽर्थे सद्-बुद्धिः आधित्स्यते, यथा आदित्य-मन-आदिषु ब्रह्मादि-बुद्धिः। यथा च लोके प्रतिमादिषु विष्ण्वादि-बुद्धिः तद्वत्। न तु 'सदेव त्वम्' इति। यदि सदेव श्वेतकेतुः स्यात् कथम् आत्मानं न विजानीयात्, येन तस्मै 'तत्वमसि' इति उपदिश्यते।

**समाधानम्**

न। आदित्यादि-वाक्य-वैलक्षण्यात्। "आदित्यो ब्रह्म" (छा. ३.१९.१) इत्यादौ इति-शब्द-व्यवधानात्[48] न साक्षात् ब्रह्मत्वं गम्यते। रूपादिमत्वाच्च आदित्यादीनाम्। आकाश-मनसोः च इति-शब्द-व्यवधानादेव अब्रह्मत्वम्। इह तु सतः एव इह प्रवेशं दर्शयित्वा तत्त्वमसि इति निरङ्कुशं[49] सदात्मभावमुपदिशति।

[48] तत्र आदित्य-उद्देशेन ब्रह्मत्व-विधाने आदित्यो ब्रह्म इत्येव अलम्। इति-पदश्रवणे तु तस्य विशेष्यत्वात्, ब्रह्म-शब्दस्य तद्विशेषणत्वात्, न आदित्य-समानाधिकरण्यं तस्य, किन्तु इतिशब्दस्यैव आदित्य-शब्द-समानाधिकरण्यं, तदर्थस्यैव विधेयत्वं प्रतीयते । तदर्थः च प्रकारः । ततश्च ब्रह्मप्रकारवान् आदित्यः इति। ब्रह्मप्रकारश्च आदित्ये न अन्यः सम्भवति इति ब्रह्मबुद्धिविषयत्वमेव विधीयते।

[49] इतिशब्द-परत्वाभावेन सामानाधिकरण्यस्य स्वरूप-पर्यवसायित्व-निश्चयात्।

**आक्षेपः**

ननु पराक्रमादि-गुणः ‘सिंहोऽसि त्वं’ इतिवत् ‘तत्त्वमसि’ इति स्यात्[50]।

**समाधानम्**

न[51], मृदादिवत् सदेकमेवाद्वितीयं सत्यं इत्युपदेशात्। न च उपचार-विज्ञानात् ‘तस्य तावदेव चिरम्’ इति सत्सम्पत्तिः उपदिश्येत। मृषात्वादुपचरित-विज्ञानस्य ‘त्वमिन्द्रोऽसि, यमः’ इतिवत्। नापि स्तुतिः[52], अनुपास्यत्वात् श्वेतकेतोः। नापि सत् श्वेतकेतुत्वोपदेशेन स्तूयेत। न हि राजा ‘दासः त्वम्’ इति स्तुत्यः स्यात्। नापि सतः सर्वात्मनः एकदेश-निरोधः युक्तः। तत्त्वमसि इति देशाधिपतेः इव ‘ग्रामाध्यक्षः त्वम्’ इति। न च अन्या गतिः इह सदात्मत्वोपदेशाद् अर्थान्तर-भूता सम्भवति।।

---

[50] प्रमाणान्तरविरोधात् एकत्वं गौणं, चैतन्य-गुण-योगेन, इति पक्षयति।

[51] गौणत्वस्य वाच्य-गौणार्थयोः भेदेन व्याप्तत्वात्, इह तु मृदादि-दृष्टान्तेन अभेद-प्रतिपादनात् न गौणत्वम्।

[52] एकत्वस्य गौणत्वे स्तुत्यर्थत्वं वक्तव्यम्, तत्र श्वेतकेतोः स्तुतिः अथवा सतः वस्तुनः इति विकल्प्य उभयमपि दूषयति।

**आक्षेपः**

ननु सदस्मि इति बुद्धिमात्रमिह कर्त्तव्यतया[53] चोद्यते। न तु अज्ञातं सदसि इति ज्ञाप्यते इति चेत्।

ननु[54] अस्मिन् पक्षेऽपि "अश्रुतं श्रुतं भवति" इत्यादि अनुपपन्नम्। न, सदस्मि इति बुद्धि-विधेः स्तुत्यर्थत्वात्।

**समाधानम्**

न। "आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरम्" (छा. ६.१४.२) इति उपदेशात्।

यदि हि सदस्मि इति बुद्धि-मात्रं कर्त्तव्यतया विधीयते, न तु त्वं-शब्द-वाच्यस्य सद्रूपत्वमेव, तदा न "आचार्यवान् वेद" इति ज्ञानोपायोपदेशः वाच्यः स्यात्। यथा "अग्निहोत्रं जुहुयात्" इत्येवमादिषु अर्थ-प्राप्तमेव आचार्यवत्वम् इति तद्वत्। "तस्य तावदेव चिरम्" इति च क्षेप-करणं न युक्तं स्यात्।

सदात्म-तत्वे अविज्ञातेऽपि सकृद् बुद्धि-मात्र-करणे मोक्षप्रसङ्गात्[55]।

---

[53] आत्मा वा अरे, स्वप्नान्तं मे सोम्य विजानीहि, इत्यादि ज्ञानविधिदर्शनात् ज्ञाननियोगनिष्ठं शास्त्रम् इत्यर्थः।

[54] एकविज्ञानेन सर्वविज्ञानवचन-विरोधात् न दृष्टिविधिपरत्वम् इति सिद्धान्त्याशङ्कामाशङ्कते पूर्ववादी।

[55] यथा सकृदनुष्ठित-यागात् स्वर्गः भवति तथा सकृदनुष्ठित-परोक्ष-बुद्धि-मात्रात् मोक्ष-सम्भवात् विलम्बाभिधानम् अनर्थकम् इत्यर्थः।

न च तत्त्वमसि इत्युक्ते ‘नाहं सत्’ इति प्रमाण-वाक्य-जनिता बुद्धिः निवर्त्तयितुं शक्या[56], नोत्पन्ना इति वा शक्यं वक्तुम्। सर्वोपनिषद्वाक्यानां तत्परतया एव उपक्षयात्। यथा अग्निहोत्रादि-विधि-जनिताग्निहोत्रादि-कर्त्तव्यता-बुद्धीनाम् अतथार्थत्वम् अनुत्पन्नत्वम् वा न शक्यते वक्तुं तद्वत्।।

यत्तूक्तं सदात्मा सन् आत्मानं कथं न जानीयादिति। नासौ दोषः। कार्य-करण-सङ्घात-व्यतिरिक्तः अहं जीवः, कर्त्ता, भोक्ता इत्यपि स्वभावतः प्राणिनां विज्ञानादर्शनात्, किमु तस्य सदात्म-विज्ञानम्। कथम् एवं व्यतिरिक्त-विज्ञाने सति, तेषां कर्त्तृत्वादि-विज्ञानं सम्भवति, दृश्यते च। तद्वत् तस्यापि देहादिषु आत्म-बुद्धित्वात् न स्यात् सदात्म-विज्ञानम्।

तस्मात् विकारानृताधिकृत-जीवात्म-विज्ञान-निवर्त्तकमेव इदं वाक्यं ‘तत्वमसि’ इति सिद्धमिति।। ३ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकर-भगवतः कृतौ छान्दोग्योपनिषद्भाष्ये षष्ठोऽध्यायः समाप्तः

---

[56] अहं सदिति प्रमाणवाक्यजनिताबुद्धिः नाहं सदिति एवं प्रकारेण निवर्त्तयितुं न शक्या इति अन्वयः।